# Subrahmanya Kavacham

**ध्यानम्**

सिन्दूरारुणमिन्दुकान्तिवदनं केयूरहारादिभिः
दिव्यैराभरणैर्विभूषिततनुं स्वर्गादिसौख्यप्रदम् ।
अम्भोजाभयशक्तिकुक्कुटधरं रक्ताङ्गरागोज्ज्वलं
सुब्रह्मण्यमुपास्महे प्रणमतां भीतिप्रणाशोद्यतम् ॥

सुब्रह्मणोऽग्रतः पातु सेनानी पातु पृष्ठतः ।
गुहो मां दक्षिणे पातु वह्निजो पातु वामतः ॥
शिरः पातु महासेनो स्कन्दो रक्षेल्ललाटकम् ।
नेत्रे मे द्वादशाक्षश्च श्रोत्रे रक्षतु विश्वभृत् ॥
मुखं मे षण्मुखः पातु नासिकां शङ्करात्मजः ।
ओष्ठौ वल्लीपतिः पातु जिह्वां पातु षडाननः ॥
देवसेनापतिः दन्तान् चुबुकं बाहुलात्मजः ।

कण्ठं तारकजित् पातु हस्तौ हस्तिमुखानुजः ॥
स्कन्धौ शक्तिधरः पातु वक्षः पातु शरोद्भवः ।
हृदयं वह्निभूः पातु कुक्षिं पात्वम्बिकासुतः ॥
नाभिं शम्भुसुतः पातु कटिं पातु हरात्मजः ।
ऊरू पातु गजारूढो जानुनी जाह्नवीसुतः ॥
जङ्घे विशाखो मे पातु पादौ मे शिखिवाहनः ।
सर्वाङ्गानि भूतेशः सप्तधातूंश्च पावकी ॥
सन्ध्याकाले निशीथिन्यां दिवा प्रातर्जले रणे ।
दुर्गमे च महारण्ये राजद्वारे महाभये ॥
निबिडेऽरण्यमध्ये च सर्वदुष्टमृगादिषु ।
चोरदुष्टभये चैव ज्वरादि व्याधिपीडने ॥
दुष्टग्रहादिभीतौ च दुर्निमित्तार्तिभीषणे ।
अस्त्रशस्त्रनिपाते च पातु मां क्रौञ्चरंध्रकृत् ॥

यः सुब्रह्मण्य कवचमिष्टदिसिद्धिप्रदं पठेत् ।
तस्य तापत्रयं नास्ति सत्यं सत्यं वदाम्यहम् ॥
धर्मार्थी लभते धर्ममर्थार्थी चार्थमाप्नुयात् ।
कामार्थी लभते कामं मोक्षार्थी मोक्षमाप्नुयात् ॥
यत्र यत्र जपेत् तत्र तत्र सन्निहितो गुहः ।
यः पठेत् शृणुयाद्भक्त्या नित्यं देवस्य सन्निधौ ॥
सुब्रह्मण्यप्रसादेन ह्यपमृत्युर्विनश्यति ।
आयुरारोग्यमैश्वर्यं पुत्रपौत्राभिवर्धनम् ॥

॥ इति कौमारतन्त्रे कौशिकप्रश्ने महासंहितायां श्रीसुब्रह्मण्य कवचं समाप्तम् ॥

**dhyānam**

sindūrāruṇamindukāntivadanaṃ keyūrahārādibhiḥ
divyairābharaṇairvibhūṣitatanuṃ svargādisaukhyapradam |

ambhojābhayaśaktikukkuṭadharaṃ raktāṅgarāgojjvalaṃ
subrahmaṇyamupāsmahe praṇamatāṃ bhītipraṇāśodyatam ||

subrahmaṇo.agrataḥ pātu senānī pātu pṛṣṭhataḥ |
guho māṃ dakṣiṇe pātu vahnijo pātu vāmataḥ ||
śiraḥ pātu mahāseno skando rakṣellalāṭakam |
netre me dvādaśākṣaśca śrotre rakṣatu viśvabhṛt ||
mukhaṃ me ṣaṇmukhaḥ pātu nāsikāṃ śaṅkarātmajaḥ |
oṣṭhau vallīpatiḥ pātu jihvāṃ pātu ṣaḍānanaḥ ||
devasenāpatiḥ dantān cubukaṃ bāhulātmajaḥ |
kaṇṭhaṃ tārakajit pātu hastau hastimukhānujaḥ ||
skandhau śaktidharaḥ pātu vakṣaḥ pātu śarodbhavaḥ |
hṛdayaṃ vahnibhūḥ pātu kukṣiṃ pātvambikāsutaḥ ||
nābhiṃ śambhusutaḥ pātu kaṭiṃ pātu harātmajaḥ |
ūrū pātu gajārūḍho jānunī jāhnavīsutaḥ ||
jaṅghe viśākho me pātu pādau me śikhivāhanaḥ |
sarvāṅgāni bhūteśaḥ saptadhātūṃśca pāvakī ||
sandhyākāle niśīthinyāṃ divā prātarjale raṇe |
durgame ca mahāraṇye rājadvāre mahābhaye ||
nibiḍe.araṇyamadhye ca sarvaduṣṭamṛgādiṣu |

coraduṣṭabhaye caiva jvarādi vyādhipīḍane ||
duṣṭagrahādibhītau ca durnimittārtibhīṣaṇe |
astraśastranipāte ca pātu māṃ krauncaraṃdhrakṛt ||

yaḥ subrahmaṇya kavacamiṣṭadisiddhipradaṃ paṭhet |
tasya tāpatrayaṃ nāsti satyaṃ satyaṃ vadāmyaham ||
dharmārthī labhate dharmamarthārthī cārthamāpnuyāt |
kāmārthī labhate kāmaṃ mokṣārthī mokṣamāpnuyāt ||
yatra yatra japet tatra tatra sannihito guhaḥ |
yaḥ paṭhet śṛṇuyādbhaktyā nityaṃ devasya sannidhau ||
subrahmaṇyaprasādena hyapamṛtyurvinaśyati |
āyurārogyamaiśvaryaṃ putrapautrābhivardhanam ||

|| iti kaumāratantre kauśikapraśne mahāsaṃhitāyāṃ śrīsubrahmaṇya kavacaṃ samāptam ||

www.kamakotimandali.com